# Himachalakritam Shiva Stotram

# हिमाचलकृतं शिवस्तोत्रम्

## Document Information

Text title : Himachalakritam Shiva Stotram

File name : himAchalakRRitaMshivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | pArvatIkhaNDa | adhyAya 12/15-19||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 19, 2024

*sanskritdocuments.org*

# हिमाचलकृतं शिवस्तोत्रम्

हिमाचल उवाच ।
देवदेव महादेव करुणाकर शङ्कर ।
पश्य मां शरणम्प्राप्तमुन्मील्य नयने विभो ॥ १५॥

शिव शर्व महेशान जगदानन्दकृत्प्रभो ।
त्वां नतोऽहं महादेव सर्वापद्विनिवर्तकम् ॥ १६॥

न त्वां जानन्ति देवेश वेदाश्शास्त्राणि कृत्स्नशः ।
अतीतो महिमाध्वानं तव वाङ्मनसोः सदा ॥ १७॥

अतद्व्यावृत्तितस्त्वां वै चकितं चकितं सदा ।
अभिधत्ते श्रुतिः सर्वा परेषां का कथा मता ॥ १८॥

जानन्ति बहवो भक्तास्त्वत्कृपां प्राप्य भक्तितः ।
शरणागत भक्तानां न कुत्रापि भ्रमादिकम् ॥ १९॥

विज्ञप्तिं शृणु मत्प्रीत्या स्वदासस्य ममाधुना ।
तव देवाज्ञया तात दीनत्वाद्वर्णयामि हि ॥ ३.१२.२०॥

सभाग्योहं महादेव प्रसादात्तव शङ्कर ।
मत्वा स्वदासं मां नाथ कृपां कुरु नमोऽस्तु ते ॥ २१॥

प्रत्यहं चागमिष्यामि दर्शनार्थं तव प्रभो ।
अनया सुतया स्वामिन्निदेशं दातुमर्हसि ॥ २२॥

इति श्रीशिवपुराणे रुद्रसंहितायां पार्वतीखण्डे द्वादशाध्यायान्तर्गतं
हिमाचलकृतं शिवस्तोत्रं समाप्तम् ।

शिवपुराण । रुद्रसंहिता । पार्वतीखण्ड । अध्याय १२/१५-१९॥

shivapurANa . rudrasaMhitA . pArvatIkhaNDa . adhyAya 12/15-19..

Proofread by PSA Easwaran

*Himachalakritam Shiva Stotram*

pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*